# Vishnuprokta Kanchayam Mahadevarchanamahima

# વિષ્ણુપ્રોક્તા કાઞ્ચાયાં મહાદેવાર્ચનમહિમા

## Document Information

Text title : Vishnuprokta Kanchayam Mahadevarchanamahima

File name : viShNuproktAkAnchAyAMmahAdevArchanamahimA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 20| 25.2-35||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 17, 2024

*sanskritdocuments.org*

# વિષ્ણુપ્રોક્તા કાઞ્ચાયાં મહાદેવાર્ચનમહિમા

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

- બ્રહ્માવિષ્ણુસંવાદે -

બ્રહ્મોવાચ

વિષ્ણો સમ્પૂજ્યતે કો વા નિત્યં કિ ધ્યાયતે મુદા ॥ ૨૫.૨॥

ચિરાદત્રૈવ સતતં સ્થીયતે ભવતા કુતઃ ।

વિષ્ણુરુવાચ

અત્ર કાઞ્ચ્યાં મહાદેવઃ કામાક્ષીવલ્લભઃ પ્રભુઃ ॥ ૨૬॥

લીલાં કરોતિ સતતં પૂજિતઃ સકલૈઃ સુરૈઃ ।
ઉમાસહાયઃ સર્વેશો મહાદેવો જગત્પ્રભુઃ ॥ ૨૭॥

પૂજ્યતે ધ્યાયતે નિત્યં પ્રણવેન મહેશ્વરઃ ।
સર્વૈશ્ચ શઙ્કરઃ સામ્બઃ પૂજનીયોઽતિભક્તિતઃ ॥ ૨૮॥

અથો મયાપિ સતતં પૂજ્યતે પાર્વતીમ્પતિઃ ।
દેવતાસાર્વભૌમોઽયં સર્વદેવશિખામણિઃ ॥ ૨૯॥

સર્વવેદાન્તવેદ્યોઽયં શઙ્કરશ્ચન્દ્રશેખરઃ ।
શિવઃ શિવાર્થિભિર્નિત્યં પૂજનીયઃ પ્રયત્નતઃ ॥ ૩૦॥

અતઃ શિવાર્થિના નિત્યં મયા સમ્પૂજ્યતે શિવઃ ।
સુરાણાં માનુષાણાં ચ સામ્બઃ સંસારમોચકઃ ॥ ૩૧॥

વિધિવત્પૂજિતો દેવઃ કુરુતે ભવમોચનમ્ ।
યાવત્પુષ્ટિર્બલં દૃષ્ટિર્યાવદાયુરનામયમ્ ॥ ૩૨॥

તાવદ્યત્નેન સમ્પૂજ્યો નિત્યં દેવઃ સદાશિવઃ ।
તસ્ય હસ્તદ્વયં ધન્યં યેન સામ્બઃ સદાશિવઃ ॥ ૩૩॥

પૂજ્યતે સાવધાનેન સ્તૂયતે મધુરોક્તિભિઃ ।

તસ્યૈવ હિ મનો ધન્યં યેન નિધ્યાયતે શિવઃ ॥ ૩૪॥

ઉદ્ધૂલિતાઙ્ગો યો નિત્યં મહેશં પૂજયેન્મુદ્રા ।
તસ્ય મૃત્યુભયં નાસ્તિ ભાગ્યસ્યાપ્યન્તમેવ ચ ॥ ૩૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુપ્રોક્તા કાઞ્ચાયાં મહાદેવાર્ચનમહિમા સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૦। ૨૫.૨-૩૫॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 20 . 25.2-35..

Notes:
Upon being asked by Brahmā બ્રહ્મા, Viṣṇu વિષ્ણુ explains that He is worshiping Mahādeva મહાદેવ of Kāñcī કાઞ્ચી, who is also known as Kāmākṣīvallabha કામાક્ષીવલ્લભ. He further elaborates about the merits of worshiping Śiva શિવ.

Proofread by Ruma Dewan

---

*Vishnuprokta Kanchayam Mahadevarchanamahima*
pdf was typeset on June 17, 2024

Please send corrections to *sanskrit@cheerful.com*